# सर्वकारीयसंस्कृमहाविदायालयः त्रिप्पूणित्तुरा

## सांस्थिकं वैशिष्ट्यम्

सर्वकारीयसंस्कृतहाविद्यालयः त्रिप्पूणित्तुरा संस्कृतषास्त्राणामध्ययनाध्यापनशोधकार्येभ्यः संस्थापिता कार्यरता चेति अस्याः महाविद्यालयेतरेभ्यः प्रथमं वैशिष्ट्यमस्ति। यद्यप्यन्यत्र केषुचित् महाविद्यालयेषु संस्कृतम् उपभाषेति पाठ्यते, तथा द्वित्रिसंस्थासु संस्कृतविभागाश्च भवन्ति तथापि पञ्चशास्त्रेषु -ज्योतिषन्यायसाहित्यवेदान्तव्याकरणेषु शैक्षणिककार्याणि नान्यत्र प्रचलति केरलराज्ये। राज्ये अस्मिन् तिरुवनन्तपुरे यद्यपि समानस्तरीः संस्कृतमहाविद्यालयः प्रवर्तते तथापि तदपेक्षया अस्य वैशिष्ट्यं नितरां शोभमानं यदस्ति तदिदानीम् अधः प्रदर्श्यते –

**स्वीयः हस्तलिखितग्रन्थालयः –** केरलसर्वकारस्य महाविद्यालयेषु अयमेकः एव महाविद्यालयो वर्तते यत्र हस्तलिखितग्रन्थानां स्वीयग्रन्थालयो भवति। अत्र सहस्राधिकहस्तलिखितग्रन्थाः तालपत्रेषु तथा उपसहस्रं ग्रन्थाः सामान्यपत्रेषु लिखिताः संरक्षिताश्च। एतेषु तालपत्रगताः अधिकतया ई-ग्रन्थरूपेण आलिखिताः संरक्षिताश्च। प्रतिवर्षमेतेषां संरक्षणाय सर्वकारसहायेन प्रयत्नाः भवन्ति। एषु ग्रन्थेषु गणितज्योतिषदर्शनायुवेदादिविषयाः प्रतिपादिताः सन्ति। एतेषु अप्रकाशितग्रन्थानां प्रकाशनाय उच्चतरशिक्षणाभियानाय योजना समर्पिता भवति।

**उपशतवर्षेभ्यः नैरन्तर्येण प्रवर्तमानम् शास्त्रार्थसदः –** प्राक्तनकोचचिराज्यं विद्वद्भ्यः कियन्महत्त्वम् अकल्पयत् इत्यस्य मापनं भवति निरन्तरतया उपशतवर्षैः प्रवर्तमानं शास्त्रसदः। प्राक्तनकेरलराज्ये संस्कृतशास्त्रेषु ये भूरिश्रममकुर्वन् ते अस्यां सभायामागत्य स्वकीयं वैदुष्यं समर्थितवन्तः। वितण्डाद्यपेक्षया वादस्य आसीत् अत्र प्राधान्यमिति वाक्यार्थसङ्ग्रहाः क्रोडपत्ररूपेण इतो प्रकाशिताः। 1925 तमे आरब्धायाः अस्याः शताब्दिः 2026 तमे वर्षे भवेत्। केरलीयाः तदिरे च संस्कृतविद्वांसः महाविद्यालयस्य एतस्मिन् कार्यक्रमे भागं गृहीत्वा स्वज्ञानस्य वर्धनमकुर्वन्। राष्ट्रपतिपुरस्कृताः प्रो. वासुदेवन् पोटी महोदयाः,प्रो. वेङ्कटराजशर्माणः, प्रो. गङ्गाधरन् नायर् महोदयाः, प्रो. रामकृष्ण भट्टाश्च सभामिमां स्वीयज्ञानदीपैः प्रकाशितवन्तः।

**परीक्षित्स्मारकान्ताराष्ट्रीयभाषणपरम्परा –** संस्कृतक्षेत्रे जायमाननूतनविकासैः समाजः परिचितो भवेत् इति अन्ताराष्ट्रस्तरे सम्मानिताः विद्वांसः अत्र स्वविचारान प्रस्तुवन्ति। देशविदेशेषु प्रसिद्धाः संस्कृतज्ञाः संक्तशैक्षणिकक्षेत्राद्बाह्याः अपि तदभिमानिनः तदध्येतारश्च महाविद्यालमागत्य स्वमतं प्रस्तुवन्ति।

**स्वीयप्रकाशनविभागः** – वर्षेभ्यः प्रागेव अस्य महाविद्यालयस्य प्रकानविभागः स्वकीयो वर्तते। महाविद्यालयसंबन्धिनां विदुषाम् मार्गदर्शने ग्रन्थान् चित्वा प्रकाशनं भवति। पूर्णत्रयीति संस्कृतशोधपत्रिकापि इतो प्रकाश्यमाना या किञ्चित्कालं स्तगिता अपि 2023 डिसम्बर् आरभ्य पुनःप्रकाश्यमाना जाता। एतावत्पर्यन्तमस्मात् प्रकाशनविभागात् उपपञ्चाशत्पुस्तकानां प्रकाशनम् अभवत्।

महती गुरुपरम्परा - संस्कृतक्षेत्रे कृतभूरिश्रमाः विद्वांसः अत्र महाविद्यालये शिक्षकाः आसन्। केरलकलामण्डलस्य प्राक्तनकुलपतिः प्रो. के. पौलोस्, व्याकरणज्योतिषशास्त्रयोः पण्डितः प्रो. कृष्णकुमार् प्रभृतयः अत्र शिक्षकाः आसन्।

**महती शिष्यसम्पत्** – महाविद्यालयस्य अस्य अन्यदिदं वैशिष्ट्यमस्ति यत् महती शिष्यसम्पद् – पूर्वछात्रसंघरूपेण अत्र कार्यरता वर्तते इति। एरणाकुलं जिल्लायां तथा केरलस्य इतरस्थानेषु च विद्यमानसंस्कताध्यापकाः अस्मात् एव महाविद्यालयात् स्नानकाः अभवन्। इतरराज्येषु अपि नैके संस्कृतशिक्षणप्राशासनिकक्षेत्रेषु कार्यरताः बवन्ति। तेषु अन्यतमो भवति प्रो. सी. जि. विजयकुमारः, यश्च इदानीं उज्जयिन्यां महर्षिपाणिनिसंस्कृत एवं वैदिकविश्वालयस्य कुलपतिः वर्तते। अस्मिन्नेव महाविद्यालये कार्यरतेषु शिक्षकेषु उपपञ्चाशत्प्रतिशतम् अस्मादेव महाविद्यालयात् ज्ञानमार्जितवन्तः।

एतैः वैशिष्ट्यैः संस्थेयं समानस्तरीयं तिरुवनन्तपुरं कलालयमपि अतिशेते। यद्यपि संस्कृतविश्वविद्यालयो वर्तते तदपेक्षया अधिकाः विषयाः अत्र पाठ्यन्ते। तथा संस्कृताय एव अयं विद्यते इति इतरमहाविद्यालयेषु इव संस्कृतं नांशिकस्थानमावहति, किन्तु मुख्यम्। संस्कृतं मुखमिति अस्य महाविद्यालयस्य महद्वैशिष्ट्यम्।